## उपशास्त्री

23.08.20
2

अथ भाग्ययोगमाह —

केन्द्रत्रिकोणाधिपयोरैकत्वे योगकारकौ ।
अन्यत्रिकोणपतिना सम्बन्धो यदि किं परम् ॥

अन्वयः — केन्द्रत्रिकोणाधिपयोः एकत्वे तौ उभौ योगकारकौ भवतः । यदि तु अन्यत्रिकोणपतिना सम्बन्धः, तदा ततः परं किं स्यात् ।

संस्कृत — सर्वोत्कृष्टं योगान्तरमाह । केन्द्रत्रिकोणाधिपयोरैकत्वे सति योगकारकौ स्तः तत्र यद्यन्यत्रिकोणपतिना सम्बन्धश्चेत्तदाऽतः परं किमपि न स्यात् अतः परं राजयोगाभाव इति अत्रैकत्वं तु स्थानाधीशत्वेन सम्बन्धेन च द्विवचनान्तत्वात् । अत्र योगविभागः । वृषभ लग्ने केन्द्रत्रिकोणाधिपः शनियोगकर्ता तत्रान्यत्रिकोणाधिपते बुधस्य सम्बन्धो भवेत्तदा प्रबलो योगः कर्कर लग्ने दशमपञ्चमाधिपतिर्भौमः तेन गुरोः सम्बन्धश्चेत्तदोत्कृष्टो योगः सिंह लग्ने चतुर्थ नवमाधीशो भौमः पञ्चमाधीशेन गुरुणा सम्बन्धं विदधाति चेत्प्रबलो राजयोगः । तुलालग्ने चतुर्थपञ्चमाधीशः शनिः नवमाधीशेन बुधेन सम्बध्यते तदा राजयोगः । मकर लग्ने पञ्चमदशमाधीशः शुक्रो नवमेशेन बुधेन सम्बन्धकौ-श्चेत्तदा प्रबलभाग्ययोगः कुम्भलग्ने चतुर्थनवमाधीशेन शुक्रेण पञ्चमाधीशो बुधस्सम्बन्धं करोति चेत्तदा प्रबलो राजयोगः । सम्बन्धवशादेकत्वेऽन्यत्रिकोणाधीशेन च सम्बन्धे पूर्वदर्शितयोगान्न्यूनो योगो विज्ञेयः । यथा मेषे चतुर्थपञ्चमाधीशयो शशिसूर्ययोस्सम्बन्धे गुरोरपि सम्बन्धश्चेत्तदापि प्रबलोयोगः परं पूर्वापेक्षयाऽस्य न्यूनत्वम् । अन्यत्रिकोणपतिना सहसम्बन्धं वदताचार्येण त्रिकोणाधिपतेः पापत्वेपि शुभत्वं वर्णितम् । यथा मकरलग्ने अन्यत्रिकोणाधिपतिर्बुधः षष्ठेशः । कर्के लग्ने अन्यत्रिकोणाधिपतिर्गुरुः षष्ठेशः त्रिकोणाधिपतेः केन्द्राधीशेन सम्बन्धो सर्वथा शुभफलद एवेति ।

(१२) कस्मिन्नक्षत्रे धारणे सर्वसुखं भवति?
उत्तरम्- चित्रायाम्।
(१३) कदा परिधाने मित्रसमागमो भवति?
उत्तरम्- अनुराधायाम्।
(१४) कदा परिधाने मिष्ठान्नभोजनं लभते?
उत्तरम्- उत्तराषाढायाम्।
(१५) कार्यसिद्ध्यै कस्मिन्नक्षत्रे परिधानीयं नूतनं वस्त्रम्?
उत्तरम्- हस्तनक्षत्रे।
(१६) कस्मिन्नक्षत्रे परिधाने जलाद्भयं जायते?
उत्तरम्- पूर्वभाद्रपद।
(१७) कदा परिधाने पुत्रलाभो जायते?
उत्तरम्- उत्तरभाद्रपद।
(१८) कदा परिधाने विषभयं जायते?
उत्तरम्- शतभिषजि।
(१९) कस्मिन्नक्षत्रे नववस्त्रधारणे रत्नलाभो भवति?
उत्तरम्- रेवत्याम्।
(२०) अविहितनक्षत्रे कदा नूतनवस्त्रपरिधानं शुभं भवति?
उत्तरम्- राजसम्माने।
(२१) वस्त्रं कतिधा विभक्तं भवति?
उत्तरम्- नवधा।
(२२) कति कोणेषु वस्त्रस्य देवता निवसन्ति?
उत्तरम्- चतुष्कोणेषु।
(२३) वस्त्रमध्ये के वसन्ति?
उत्तरम्- मानवाः।
(२४) वस्त्रस्य शेषभागे के निवसन्ति?
उत्तरम्- राक्षसाः।

डॉ० सुदिवर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

## लघुपाराशरी

## उपशास्त्री

23.08.20

1

अथ पापग्रहसम्बन्धेन योगफलप्राप्तिकालमाह —

योगकारकसम्बन्धात्पापिनोऽपि ग्रहाः स्वतः।

तत्तद्भुक्त्यनुसारेण दिशेयुर्योगजं फलम्॥

अन्वयः — स्वतः पापिनः अपि ग्रहाः योगकारकसम्बन्धात् तत्तद् भुक्त्यनुसारेण योगजं फलं दिशेयुः।

संस्कृत - स्वतः पापिनोऽपि ग्रहा त्रिषडायाधीशा अपि योगकारकसम्बन्धाद्योगकारकग्रहसम्बन्धेन तत्तद्भुक्त्यनुसारेण तत्तद्ग्रहान्तर्दशानुसारेण योगजं फलमेव दिशेयुः अर्थात् योगकारक ग्रहेण सह यदि पापानामपि सम्बन्धश्चेत्तदा तत्र यदि भागमयोगावशिष्टत्वं स्यात्तदा पापग्रहा अपि स्व दशायां योगकारकग्रहस्यान्तर्दशायां शुभफलमेव दद्युरिति। एतेन पापानां दशासु तत्सम्बन्धिशुभभुक्तौ शुभफलमेव स्यादिति सूचितम्।

क्षेमङ्करी- योगकारक ग्रह के साथ सम्बन्ध होने से त्रिषडायाधीश भी अपनी दशा में शुभग्रह की अन्तर्दशा में शुभ फल ही देते हैं। अर्थात् योगकारक ग्रह के साथ सम्बन्ध होने से पापी ग्रह की दशा में भी जब शुभदायी ग्रह की अन्तर्दशा होती है, तब शुभ ही फल होता है।

विमर्श— प्रायः योगकारी ग्रहों से सम्बन्धित ग्रह चाहे शुभ हो या अशुभ वह अपनी मध्यगत दशा में शुभ फल ही करेगा। मारक होने पर भी शुभ फल देगा। निष्कर्ष यह है कि योगकारक ग्रहों के मध्य में पड़ने वाली मध्यवर्ती दशा का स्वामी ग्रह पाराशरी सिद्धान्तानुसार शुभ होने पर शुभ एवं अशुभ फलदायी होगा।

P.T.O

डॉ० सुदिप्त कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

वस्तुनिष्ठप्रश्ना:

शास्त्री-I, II

23.08.20
3

(1) दीर्घग्रीवा कुमारी भवति ?
उत्तरम्- कुलक्षयकर्त्री ।
(2) कुलक्षयकरी दीर्घा ग्रीवा ह्रस्वा च निर्धना ।
पृथुर्ग्रीवा प्रचण्डत्वं ग्रीवया योषितो वदेत् ॥
कस्येदं पद्यम् ?
उत्तरम्- समुद्रस्य ।
(3) पारावताक्षी या कन्या कातराक्षी तथापि या ।
उद्भ्रान्तचपलाक्षी च तां कन्यां वर्जयेद्बुधः ॥
यस्यास्तु रुदमानाया जायन्ते गण्डकूपकाः ।
भर्तारं हन्ति सा क्षिप्रं नैकत्र रमते चिरम् ॥
कस्य वाक्यमिदं स्पष्टयत ?
उत्तरम्- समुद्रस्य ।
(4) लम्बललाटा कं हन्ति ?
उत्तरम्- देवरम् ।
(5) लम्बोदरी कं हन्ति ?
उत्तरम्- श्वसुरम् ।
(6) स्तनरोमा कीदृशी भवति ?
उत्तरम्- चौरा ।
(7) कीदृशाः दन्ताः कुमारीणां वैधव्यकारकाः ?
उत्तरम्- स्थूलाः ।
(8) का स्त्री भर्तुर्निधनकारिणी भवति ?
उत्तरम्- रूक्षकेशाः ।
(9) कुमारीणां शुभाशुभज्ञानाय कतिभागेषु विभक्तं शरीरम् ?
उत्तरम्- दशभागेषु ।
(10) नूतनवस्त्रधारणे कानि नक्षत्राणि शुभानि ?
उत्तरम्- अश्विनी ।
(11) कस्मिन्नक्षत्रे परिधाने मरणम् ?
उत्तरम्- आर्द्रायाम् ।

P.T.O